# Purushasukta

# પુરુષસૂક્ત

## Document Information

Text title : purushhasuukta

File name : puruSukta.itx

Category : sUkta, veda, svara, upanishhat

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer

Proofread by : Rajagopal Iyer

Latest update : May 20, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2025

*sanskritdocuments.org*

# પુરુષસૂક્ત

અથ પુરુષસૂક્તમ્ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવી સ્વસ્તિરસ્તુ નઃ ।

સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

હરિઃ ૐ ।

ૐ સહસ્રશીર્ષા પુરુષઃ । સહસ્રાક્ષઃ સહસ્રપાત્ ।

સ ભૂમિં વિશ્વતો વૃત્વા । અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ । ૧

પુરુષ એવેદꣳ સર્વમ્ । યદ્ભૂતં યચ્ચ ભવ્યમ્ ।

ઉતામૃતત્વસ્યેશાનઃ । યદન્નેનાતિરોહતિ । ૨

એતાવાનસ્ય મહિમા । અતો જ્યાયાꣳશ્ચ પૂરુષઃ ।

પાદોઽસ્ય વિશ્વા ભૂતાનિ । ત્રિપાદસ્યામૃતં દિવિ । ૩

ત્રિપાદૂર્ધ્વ ઉદૈત્પુરુષઃ । પાદોઽસ્યેહાઽઽભવાત્પુનઃ ।

તતો વિશ્વઙ્વ્યક્રામત્ । સાશનાનશને અભિ । ૪

તસ્માદ્વિરાડજાયત । વિરાજો અધિ પૂરુષઃ ।

સ જાતો અત્યરિચ્યત । પશ્ચાદ્ભૂમિમથો પુરઃ । ૫

યત્પુરુષેણ હવિષા । દેવા યજ્ઞમતન્વત ।

વસન્તો અસ્યાસીદાજ્યમ્ । ગ્રીષ્મ ઇધ્મઃ શરદ્ધવિઃ । ૬

સપ્તાસ્યાસન્પરિધયઃ । ત્રિઃ સપ્ત સમિધઃ કૃતાઃ ।

દેવા યદ્યજ્ઞં તન્વાનાઃ । અબધ્નન્પુરુષં પશુમ્ । ૭

તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ । પુરુષં જાતમગ્રતઃ ।

તેન દેવા અયજન્ત । સાધ્યા ઋષયશ્ચ યે । ૮

તસ્માદ્યજ્ઞાત્સર્વહુતઃ । સંભૃતં પૃષદાજ્યમ્ ।

પશૂꣳ સ્તાꣳશ્ચક્રે વાયવ્યાન્ । આરણ્યાન્ગ્રામ્યાશ્ચ યે । ૯
તસ્માદ્યજ્ઞાત્સર્વહુતઃ । ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાꣳસિ જજ્ઞિરે તસ્માત્ । યજુસ્તસ્માદજાયત । ૧૦
તસ્માદશ્વા અજાયન્ત । યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્ । તસ્માજ્જાતા અજાવયઃ । ૧૧
યત્પુરુષં વ્યદધુઃ । કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ । કાવૂરૂ પાદાવુચ્યેતે । ૧૨
બ્રાહ્મણોઽસ્ય મુખમાસીત્ । બાહૂ રાજન્યઃ કૃતઃ ।
ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાꣳ શૂદ્રો અજાયત । ૧૩
ચન્દ્રમા મનસો જાતઃ । ચક્ષોઃ સૂર્યો અજાયત ।
મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત । ૧૪
નાભ્યા આસીદન્તરિક્ષમ્ । શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્ । તથા લોકાꣳ અકલ્પયન્ । ૧૫
વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસસ્તુ પારે ।
સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન્ યદાસ્તે । ૧૬
ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્પ્રદિશશ્ચતસ્રઃ ।
તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે । ૧૭
યજ્ઞેન યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્તે । યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ । ૧૮

॥ ૐ નમો નારાયણાય ॥

॥ ઉત્તરનારાયણમ્ ॥

અદ્ભ્યઃ સંભૂતઃ પૃથિવ્યૈ રસાચ્ચ । વિશ્વકર્મણઃ સમવર્તતાધિ ।
તસ્ય ત્વષ્ટા વિદધદ્રૂપમેતિ । તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે । ૧
વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા વિદ્યતેઽયનાય । ૨
પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ । અજાયમાનો બહુધા વિજાયતે ।
તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ્ । મરીચીનાં પદમિચ્છન્તિ

વેધસઃ । ૩

યો દેવેભ્ય આતપતિ । યો દેવાનાં પુરોહિતઃ ।

પૂર્વો યો દેવેભ્યો જાતઃ । નમો રુચાય બ્રાહ્મયે । ૪

રુચં બ્રાહ્મમ્ જનયન્તઃ । દેવા અગ્રે તદબ્રુવન્ ।

યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત્ । તસ્ય દેવા અસન્ વશે । ૫

હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ । અહોરાત્રે પાર્શ્વે ।

નક્ષત્રાણિ રૂપમ્ । અશ્વિનૌ વ્યાત્તમ્ । ઇષ્ટમ્ મનિષાણ ।

અમું મનિષાણ । સર્વમ્ મનિષાણ । ૬

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવીસ્સ્વસ્તિરસ્તુ નઃ ।

સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

Encoded by Rajagopal Iyer rajsand at yahoo.com

*Purushasukta*

pdf was typeset on March 3, 2025

Please send corrections to *sanskrit@cheerful.com*